# Shri Ganesha Stotram Ahamkritam

# અહંકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Ahamkritam

File name : gaNeshastotramahaMkRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 2 | 8.2 1-14||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# અહંકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

અહમુવાચ ।

નમસ્તે ગણનાથાય હેરમ્બાય પરાત્મને ।

સર્વેભ્યો વરદાત્રે તે વરદાય નમો નમઃ ॥ ૧॥

બ્રહ્મસુ બ્રહ્મનાથાય નિજેષુ સ્વસ્વરૂપિણે ।

સાઙ્ખ્યાય તે પરત ઉત્થાનસ્થેષુ નમો નમઃ ॥ ૨॥

જ્ઞાનેષુ બોધરૂપાય સોઽહન્દેહિષુ તે નમઃ ।

દેહેષુ બિન્દુરૂપાય વિઘ્નેશાય નમો નમઃ ॥ ૩॥

સ્રષ્ટૃષુ બ્રહ્મદેવાય વિષ્ણવે પાલકેષુ તે ।

સંહર્તૃષુ શિવાયૈવૈકદન્તાય નમો નમઃ ॥ ૪॥

પ્રકાશકેષુ સૂર્યાય મોહકેષુ ચ શક્તયે ।

દેવેષુ દેવરાજાય વિનાયકાય તે નમઃ ॥ ૫॥

અગ્નયે તે દાહકેષુ યમાય નીતિધારિણામ્ ।

રક્ષઃસુ નૈરૃતાયૈવ શૂર્પકર્ણાય તે નમઃ ॥ ૬॥

વાયવે બલયુક્તેષુ નિધિષુ ધનપાય તે ।

રુદ્રેષુ કાલરૂપાય નમો લમ્બોદરાય વૈ ॥ ૭॥

પ્રજાપતિષુ દક્ષાય નાગેશે શેષરૂપિણે ।

અનન્તવિભવાયૈવ કિં તે સ્તૌમિ નમો નમઃ ॥ ૮॥

યં સ્તોતું ન સમર્થાશ્ચ વેદાદ્યા યોગિનોઽમલાઃ ।

તં કિં સ્તવીમિ વિઘ્નેશમલ્પબુદ્ધિપ્રધારકઃ ॥ ૯॥

ધન્યોઽહં કૃતકૃત્યોઽહં સફલો મે ભવઃ પિતા ।

માતા કુલં તથા જ્ઞાનં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૧૦॥

એવમુક્ત્વા ગણેશાનં પ્રણનામ મહાસુરઃ ।

હર્ષેણ મહતા યુક્તસ્તમુવાચ ગજાનનઃ ॥ ૧૧॥

(ફલશ્રુતિઃ)

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
પઠતે શ‍ૃણ્વતે ચૈવ મયિ ભાવપ્રદાયકમ્ ॥ ૧૨॥
પુત્રપૌત્રાદિકં સૌખ્યં ભુક્તિં મુક્તિં લભેન્નરઃ ।
અસ્ય પઠનમાત્રેણ મદ્ભક્તિં ભ્રમનાશિનીમ્ ॥ ૧૩॥
વરાન્ વૃણુ મહાભાગ મનેપ્સિતાન્ દદામ્યહમ્ ।
તપસા સ્તોત્રમુખ્યેન તુષ્ટોઽહં તે મહાદરાત્ ॥ ૧૪॥

ઇતિ અહંકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૨ । ૮.૨ ૧-૧૪॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 2 . 8.2 1-14..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stotram Ahamkritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*